শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী মুক্কূর্ লক্ষ্মীনৃসিংহস্বামিনা অনুগৃহীতং

# ॥ শ্রী নঙ্গৈনল্লূর্ মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নঙ্গৈনল্লূর্ মঙ্গলম্ ॥

নঙ্গৈনল্লূর্ অগ্রহারে নতানাং ফলমদ্ভুতম্।
দৃশ্যতে ভদ্রযা ভদ্রো যজ্ঞেশো নৃহরিঃ পরঃ ॥ **1** ॥

নঙ্গৈনল্লূর্ নিৱাসায তুঙ্গ মঙ্গল রূপিণে।
গঙ্গা সলিল পাদায শ্রী নৃসিংহায মঙ্গলম্ ॥ **2** ॥

নৱনীতায কৃষ্ণায নৱমোহন রূপিণে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **3** ॥

রামায রামভদ্রায রমালোলায ধীমতে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **4** ॥

শ্রীনিৱাসায নিধযে শ্রীধরায মহাত্মনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **5** ॥

সুদর্শনায দেৱায সুপ্রসন্নায চক্রিণে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **6** ॥

ষণ্ণৱতী মহাযজ্ঞে শোভিতায গুণাত্মনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **7** ॥

ধনুর্ধরায দেৱায ধীরায পরমাত্মনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **8** ॥

নারাযণ যতীন্দ্রেণ অর্চিতায স্থিরায চ।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ **9** ॥

মট্টপল্লি শ্রীনৃসিংহ প্রিযায পরমাত্মনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **10** ॥

মঙ্গলগিরি নাথায ৱেদাদ্রি পুর ৱাসিনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **11** ॥

ঘটিকাচলান্তর্ৱেদ্যাম্ সুস্থিরায ৱরায চ।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **12** ॥

হৃষীকেশ যাদগির্যাং শোভনাদ্রি নিৱাসিনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **13** ॥

শ্রী মট্টপল্লি নাথায নৈমিশারণ্য রূপিণে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **14** ॥

দীপালযায দেৱায সিংহাচল নিৱাসিনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **15** ॥

বৃন্দাৱন ৱিহারায শ্রীরঙ্গপুর শাযিনে।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **16** ॥

মট্টপল্ল্যান্ নঙ্গৈনল্লূর্ আগতায স্থিরায চ।
নঙ্গৈনল্লূর্ নিৱাসায শ্রী নৃসিংহায মঙ্গলম্॥ **17** ॥

মুক্কূর্ নৃসিংহদাসেন জযমঙ্গলমদ্ভুতম্।
নারাযণ যোগিৱর্য কৃপযা প্রোক্তমৱ্যযম্॥ **18** ॥

॥ শ্রী নঙ্গৈনল্লূর্ মঙ্গলং সমাপ্তম্॥